संस्कृतवार्ता:

दिनाङ्क :-22.12.2024

प्रात: - 06:55

प्रधानमन्त्री-कुवैतनगरे

प्रधानमन्त्री नरेन्द्रमोदी अद्य कुवैतनगरे कुवैतनेतृभिः सह वार्तालापं करिष्यति। श्रीमोदिने बयानपैलेस इत्यत्र औपचारिकरूपेण गार्ड ऑफ ऑनर इति सम्मानरक्षकं प्रदत्तं भविष्यति, तदनन्तरं सः कुवैतस्य अमीरेण कुवैतस्य युवराजेन च सह पृथक् पृथक् मेलनं अपि करिष्यति। प्रधानमन्त्री श्रीमोदी कुवैतस्य प्रधानमन्त्रिणा सह प्रतिनिधिमण्डलस्तरस्य वार्ताम् अपि करिष्यति। प्रधानमन्त्री पश्चिम एशियाराष्ट्रस्य द्विदिवसीय यात्रायां कुवैतदेशम् संप्राप्तवान् अस्ति , यत् त्रिचत्वारिंशत् वर्षेषु भारतीयप्रधानमन्त्रिणः कुवैतदेशस्य प्रथमा यात्रा अभवत्। सः कुवैतस्य अमीरस्य शेख मेशल् अल-अहमद-अल्-जबर् अल- सबाहस्य आमन्त्रणे कुवैतस्य यात्रायाम् अस्ति। ह्यः कुवैतनगरे श्रीमोदी 'हालामोदी' इति विशिष्ट कार्यक्रमे भारतीयप्रवासिनः विशालसमागमं सम्बोधितवान्। सः कुवैतस्य विकासाय भारत-कुवैत-सम्बन्धानां पोषणाय च भारतीयसमुदायस्य परिश्रमस्य, उपलब्धेः, योगदानस्य च प्रशंसाम् अकरोत् । प्रधानमन्त्री श्रीमोदी आगामिमासे भारतीयप्रवासीदिवसे महाकुम्भमेलापके च भागं ग्रहीतुं प्रवासीसदस्यान् आमन्त्रितवान् ।

शाह:-पूर्वोत्तर परिषद्

गृहमन्त्रिणा अमित शोहेनोक्तं यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना पूर्वोत्तरीय-क्षेत्रं विश्वस्य केन्द्रं विनिर्मितम्। अगरतलायाम् ह्यः पूर्वोत्तर-परिषद: द्वि-सप्तति तमीये पूर्ण-सत्रं सम्बोधयता तेनोक्तं यत् विगतानि दश-वर्षाणि पूर्वोत्तरीय-क्षेत्राणाञ्कृते महती-महत्वपूर्णानि आसन्। तेन भणितं यत् केन्द्र सर्वकार: निवेशकान् पूर्वोत्तर-क्षेत्रेषु विनिवेशाय प्रोत्साहयति।

श्री शाहेनोक्तं यत् पूर्वं पूर्वोत्तरस्य केवलं चर्चा एव प्रचलति स्म्। अधुना प्रधानमन्त्रिणा क्षेत्रस्यास्य विकासाय निष्पक्षतया बहव: प्रयासा: विहिता:। एतेन

क्षेत्राणि एतानि महत्वपूर्णाणि सञ्जातानि, केन्द्रीय गृहमन्त्रिणोक्तं यत् आगामिषु दिवसेषु पूर्वोत्तरस्य सर्वाणि राज्यानि समृद्धानि भविष्यन्ति। तेन एतदपि भणितं यत् प्रधानमन्त्री नरेन्द्र मोदी तदीय भारतीय जनता पार्टीति दलं च पूर्वोत्तरं अशेष-देशस्य समक्षं आनेष्यति। श्री शाहेन प्रतिपादितं यत् क्षेत्रेऽस्मिन् उग्रवादी गतिविधय: अपि अपचिता: जाता:। मानव जीवनस्य क्षति: अपि न्यनीभूता।

मीआ जर्मनी-

जर्मनीदेशस्य मैग्डेबर्ग्-नगरे पञ्चजनाः मृताः, द्विशततोप्यधिकाः जनाः च घातिताः, आक्रमणस्यास्य भारतेन निन्दा कृता। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् क्रिसमस-आपणे भयावहं निरर्थकं च आक्रमणम् इत्यपि वर्णितम्। मैग्डेबर्ग् क्रिसमस आपणे जाते आक्रमणे सप्त भारतीयाः अपि घातिताः।

महिलाक्रिकेट्-

अद्य वडोदरानगरस्य कोटाम्बी-क्रीडाङ्गणे आईसीसी-चैम्पियनशिप-श्रृङ्खलायाः प्रथमे द्वन्द्वे भारतीय-महिला-क्रिकेट्-दलं वेस्ट्-इण्डीज-दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः अपराह्णे सार्ध एक वादने भविष्यति।

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। कृपया श्रृण्वन्तु।